[1]उपधा चात्र इगेव गृह्यते, ततो भिनत्ति इति गुणो न भवति। अपरे पुकि अन्तः पुगन्तः, लघ्वी उपधा लघूपधा, पुगन्तश्च लघूपधा च पुगन्तलघूपधम् इति सूत्रार्थं वर्णयन्ति॥

## नाभ्यस्तस्याचि पिति सार्वधातुके। (८७/२५०३)

[2]अभ्यस्तसञ्ज्ञकस्य अङ्गस्य लघूपधस्य [3]अजादौ पिति सार्वधातुके गुणो न भवति। नेनिजानि। वेविजानि। परिवेविषाणि। अनेनिजम्। अवेविजम्। पर्यवेविषम्। अभ्यस्तस्य इति किम्? वेदानि[4]। अचि इति किम्? नेनेक्ति[5]। पिद्ग्रहणमुत्तरार्थम्। सार्वधातुके इति किम्? निनेज। लघूपधस्य इत्येव, जुहवानि। अजुहवम्।

[८६२] बहुलं छन्दसीति वक्तव्यम्। (म. भा. ३.३३८)

[6]जुजोषत् इति यथा स्यात्। पस्पशाते। चाकशीति। वावशीति[7]। यङ्लुकि [8]छान्दसमुपधाह्रस्वत्वं द्रष्टव्यम्। पस्पशाते इत्यत्र अभ्यासह्रस्वत्वं च। प्रकृत्यन्तराणां वा स्पशिकशिवशीनामेतानि रूपाणि॥

## भूसुवोस्तिङि। (८८/२२२४)

भू सू इत्येतयोः तिङि सार्वधातुके गुणो न भवति। अभूत्। अभूः। [9]अभूवम्। सुवै, सुवावहै, [10]सुवामहै। सूतेर्लुग्विकरणस्येदं ग्रहणम्। सुवतिसूयत्योर्विकरणेन तिङो व्यवधानम्। विकरणस्यैव ङित्त्वाद् गुणाभावः सिद्धः। तिङि इति किम्? भवति। सार्वधातुके इत्येव, व्यतिभविषीष्ट। अथ बोभवीति इति यङ्लुकि [11]गुणप्रतिषेधः कस्मान्न भवति? ज्ञापकात्, यदयं बोभूतु इति [12]गुणाभावार्थे निपातनं करोति॥

## उतो वृद्धिर्लुकि हलि। (८९/२४४३)

[13]सार्वधातुके पिति इति वर्तते[14]। उकारान्तस्य अङ्गस्य वृद्धिर्भवति लुकि सति हलादौ पिति सार्वधातुके[15]। यौति। यौषि। यौमि। नौति। नौषि। नौमि। स्तौति। स्तौषि। स्तौमि। उतः इति किम्? एति। एषि। एमि। लुकि इति किम्? सुनोति। सुनोषि। सुनोमि। हलि इति किम्? यवानि। रवाणि। पिति इत्येव, युतः। रुतः। अपि स्तुयाद् राजानम् इत्यत्र हि ङिच्च पिन्न भवति इति पित्त्वप्रतिषेधाद् [16]वृद्धेरभावः। नाभ्यस्तस्य (७.३.८७/२५०३) इत्येतदिहानुवर्तते, योयोति, रोरोति इत्येवमाद्यर्थम्॥

## ऊर्णोतेर्विभाषा। (९०/२५४७)

ऊर्णोतेर्विभाषा वृद्धिर्भवति हलादौ पिति सार्वधातुके[17]। प्रोर्णौति, प्रोर्णोति। प्रोर्णौषि, प्रोर्णोषि। प्रोर्णौमि, प्रोर्णोमि। हलि इत्येव, प्रोर्णवानि॥

---

1. उपधा तु ब. 2. अभ्यस्तस्याङ्गस्य क.इ. 3. अचि ब. 4. अवेदम् इत्यधिकम् क. 5. वेवेक्ति इत्यधिकम् क. ह, वेवेष्टि इत्यधिकम् ह. 6. जुजुषत् ब. क. इ. ह. 7. इति इत्यधिकम् इ. 8. छन्दसि उपसङ्ख्यानं वाङ्गस्य क. 9. अभूवम् नास्ति क, अभूः नास्ति क. इ. 10. सुवामहै नास्ति इ. 11. प्रतिषेधः क. इ. 12. झेर्गुणाभावार्थम् यङ्लुकि क. 13. वाक्यमिदं नास्ति ह. 14. एव इत्यधिकम् क. 15. परतः। रौति रौषि रौमि इत्यधिकम् क. इ. 16. वृद्धेः गुणभावः क. 17. परतः इत्यधिकम् क. इ.